देवभेदे दलरूपपत्रविशेषाणां प्रीतिकरत्वमुक्तं यथा "पत्राण्यपि सपुष्पाणि हरेः प्रीतिकराणि च। प्रवक्ष्यामि नृपश्रेष्ठ! शृणुष्व गदतो मम। अपामार्गकं प्रथमं तस्माद् भृङ्गारकं परम्। तस्मात्तु खादिरं श्रेष्ठं ततश्च शमीपत्रकम्। दुर्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम्। पत्रं तस्माद्दमनकं ततो विल्वस्य पत्रकम्। विल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम्। एतेषां च यथा लब्धैः पत्रैर्वा योऽर्च्चयेद्धरिम्। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते" नरसिंहपु० ५२ अ०। देवीप्रीतिकरपत्राणि यथा "अपामार्गस्य पत्रन्तु ततो भृङ्गारपत्रकम्। ततोऽपि गन्धिनीपत्रं वलाहकमतः परम्। तस्मात् खदिरपत्रं तु वञ्जुलस्तवकस्तथा। ध्याम्नन्तु वकगुच्छस्तु जम्बूपत्रं ततः परम्। वीजपूरस्य पत्रं तु ततोऽपि कुशपत्रकम्। दूर्वाङ्कुरं ततः प्रोक्तं शमीपत्रमतः परम्। पत्रमामलकं तस्माद्दामपत्रमतःपरम्। सर्वतो विल्वपत्रन्तु देव्याः प्रीतिकरं मतम्" कालिकापु०।

**पत्रक** न० पत्त्र+स्वार्थे क तदिव कायति कै—क वा। १हस्तस्य पर्णे २पत्रावल्यां शब्दर०। ३तेजपत्रे राजनि० ४शालिञ्चशाके पु० रत्नमाला। ५पत्त्रभङ्गे न० शब्दच०।

**पत्त्रकाहला** स्त्री १पिञ्जलायां २पत्त्रशब्दे च हारा०।

**पत्त्रगुप्त** पु० पत्त्रं गुप्तमस्य पद्दनि०। (तेकाटा सिजु) त्रिकण्टे शब्दच०।

**पत्त्रघना** द्वत०३त०। सातलावृक्षे राजनि०।

**पत्त्राङ्ग** न० पत्त्रमज्यते अनेन अन्ज—करणे घञ् शक०। रक्तचन्दनाकारे (वकम) वृक्षे शब्दच०। [त्रिका०।

**पत्त्रभङ्कार** पु० पत्त्रे भङ्कारोऽस्य। पुरोटिवृक्षे (रायभटी)

**पत्त्रणा** स्त्री पत्त्रं नम्यतेऽत्र नम—बा० ड संज्ञात्वात् णत्वम्। पत्ररचनायाम् हारा०।

**पत्त्रतण्डुली** स्त्री पत्त्रे तण्डुलाः सन्त्यस्याः अच् गौरा० ङीष्। यवतिक्तायाम् राजनि०।

**पत्त्रतरु** पु० पत्त्रप्रधानस्तरुः शा० त०। दुर्खदिरे राजनि०

**पत्त्रदारक** पु० पत्त्रमिव दारयति दारि—ण्वुल्। क्रकचे (करात) त्रिका०।

**पत्त्रनाडिका** स्त्री द्वत०। पर्णसिरायाम् जटा०।

**पत्त्रपरशु** पु० पत्त्रे धातुमयपत्त्रे परशुरिव। (छेनी) ख्याते स्वर्णकारयन्त्रभेदे। पत्त्रपर्शुरप्यत्र शब्दर०।

**पत्त्रपाल** पु० असिलतायां क्षुरिकायां हेमच०।

**पत्त्रपाली** स्त्री पत्राकारा पालिरग्रं यस्याः वा ङीप्। (काँचि) कर्त्तर्यां हलायु०तस्याः पर्णतुल्याग्रत्वात्तथात्वम्।

**पत्त्रपाश्या** स्त्री पत्रमिव पाश्या। स्वर्णादिरचितललाटालङ्कारभेदे (टीका) अमरः।

**पत्त्रपिशाचिका** स्त्री पत्त्रेण पिशाचीव इवार्थे कन्। जलवारणसाधने यन्त्रभेदे (टोका) त्रिका०।

**पत्त्रपुष्प** पु० पत्त्रं पुष्पमिवास्य। १रक्ततुलस्यां शब्द० २तुलस्यां स्त्री टाप् शब्दमाला। क्षुद्रपत्त्रतुलस्याम् स्त्री रत्नमाला ङीप्। कप्। पत्त्रपुष्पक भुर्जपत्रे शब्दमा०।

**पत्त्रबन्ध** पु० पत्त्राकारः बन्धः। पुष्परचनाभेदे शब्दरत्ना०।

**पत्त्रभङ्ग** पु० पत्राकारः भङ्गः रचना। स्तनकपोलादौ कस्तूरकादिरचितपत्रश्रेण्यां तिलकभेदे हेम० पत्रभङ्गि, पत्त्रभङ्गीत्यपि तत्र स्त्री शब्दर०।

**पत्त्रमञ्जरी** स्त्री द्वत०। १पर्णस्याग्रभागे २पत्राकारमञ्जरीयुते तिलकभेदे हेमच०। [२तत्समुदाये स्त्री।

**पत्त्रमाल** पु०पत्त्राणां माला यत्र। १वेतसे नैघण्टु० द्वत०।

**पत्त्रमूल** पु० द्वत०। पर्णस्य मूले ततः प्रकारे स्थूला० कन्। पत्रमूलक तत्प्रकारे न०। तत्र गणे पत्रमूलेति व्यस्तं समस्तञ्च तेन पत्रक मूलक तत्तत्प्रकारे न०

**पत्त्रयौवन** न० पत्रस्य यौवनमत्र। नवपल्लवे जटाध०

**पत्त्ररथ** स्त्री पत्त्रं पक्षो रथ इव यस्य। खगे अमरः जातित्वात् स्त्रियां ङीष्। [भेदे हेमच०।

**पत्त्र(रे)लेखा** स्त्री पत्त्राकारा(रे)लेखा। पत्त्रभङ्गे तिलक०

**पत्त्रल** न० पत्त्रमिवाकारोऽस्त्यस्य सिध्मा० लच्। द्रुपसे (पातालादह) हेमच०।

**पत्त्रलता** स्त्री पत्त्राकारा लता यत्र। पत्त्राकारे १तिलकभेदे हेमच० शा०त०। २पत्त्रप्रधानलतायाम्।

**पत्त्रलवण** न० पत्रविशेषेण पक्वं लवणम् शा०त०। सुश्रुतोक्ते लवणभेदे "गन्धर्वहस्तकमुष्ककनक्तमालाटरूषकपूतीकारग्वधचित्रकादीनां पत्राण्यार्द्राणि लवणेन सहोदूखलेऽवक्षुद्य स्नेहघटे प्रक्षिप्यावलिप्य गोमयाग्निना दहेदेतत् पत्रलवणमुपदिशन्ति वातरोगेषु"।

**पत्त्रवल्लरी** स्त्री पत्त्रयुक्ता वल्लरीव। तिलकभेदे पत्त्रभङ्गे हेमच० पत्त्रवल्लीत्यप्यत्र।

**पत्त्रवाह** पु० पत्त्रं पक्षं लिपिं वा वहति वह—अण् उप० स०। १पत्त्रवाहे खगे २शरे जटा० ३लिपिवाहके त्रि०।

**पत्त्रविशेषक** न० पत्त्रमिव विशेषो यत्र कप्। तिलकभेदे

**पत्त्रवृश्चिक** पु० पत्त्रमिव वृश्चिकः। पत्त्राकारे वृश्चिकभेदे सुश्रु० कीटशब्दे दृश्यम्।